CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लक्ष्मीनारायण हृदयम्

~~58~~

Printed

CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीलक्ष्मीनारायणायनमः॥श्रीलक्ष्मी
हृदयप्रारंभः ॥ आद्यादिश्रीमहालक्ष्मी
हृदयस्तोत्रमंत्रस्य भार्गवऋषिः॥ आ
द्यादिश्रीमहालक्ष्मीर्देवता॥अनुष्टुबादि
नानाविधानिच्छन्दांसि ॥श्रीँ बीजम्॥
ह्रीँ शक्तिः॥ ऐँ कीलकम्॥आद्यादिश्री
महालक्ष्मीप्रीत्यर्थेजपेविनियोगः॥ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीँ बीजेनषड्वारंकरशुद्धिंकुर्यात् ॥ अ
थन्यासः ॥ ॥ ॐ भार्गवऋषयेनमः शि
रसि ॥ अनुष्टुबादिनानाछंदोभ्योनमः
मुखे ॥ आद्याश्रीमहालक्ष्म्यैदेवतायै
नमःहृदये ॥ श्रीँ बीजायनमः गुह्ये ॥
श्रीँ शक्तयेनमः पादयोः ॥ ऐंकीलकाय १
नमः सर्वांगे ॥ ॥ अथकरन्यासः ॥ ॐ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीँ अंगुष्ठाभ्यांनमः ॥ ॐ ह्रीँ तर्जनी
भ्यांनमः ॥ ॐ ऐँ मध्यमाभ्यांनमः ॥
ॐ श्रीँ अनामिकाभ्यांनमः ॥ ॐ ह्रीँ क
निष्ठिकाभ्यांनमः ॥ ॐ ऐँ करतलकरपृ
ष्ठाभ्यांनमः ॥ ॐ श्रीँ हृदयायनमः ॥ ॐ
ह्रीँ शिरसेस्वाहा ॥ ॐ ऐँ शिखायैवषट् ॥
ॐ श्रीँ कवचायहुम् ॥ ॐ ह्रीँ नेत्रत्रयाय

CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वौषट्॥ॐऐं अस्त्रायफट्॥ॐश्रीं ह्रीं ऐं
इतिदिग्बंधः ॥अथध्यानम् ॥ हस्तद्वयेन
कमलेधारयंतींस्वलीलया॥हारनूपुरसं
युक्तांलक्ष्मींदेवींविचिंतये॥ इति ध्या
त्वासंपूज्य॥ शंखचक्रगदाहस्तेशुभ्रव
र्णेसुवासिनि ॥ ममदेहिवरंलक्ष्मिसर्व
सिद्धिप्रदायिनि ॥ इतिसंप्रार्थ्य ॥ ॐ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्री ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यैस्वाहा॥ इति मंत्रंजपित्वा पुनः पूर्ववद्धृदयादिषडंगन्यासंकृत्वा स्तोत्रंपठेत्॥ तदित्थम्॥ वंदेलक्ष्मीं पर शिवमयींशुद्धजांबूनदाभां तेजोरूपां कनकवसनांसर्वभूषोज्ज्वलांगीम्॥ बीजापूरंकनककलशं हेमपद्मंदधाना

CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ल० माद्यांशक्तिं सकलजननीं विष्णुवा ह०
३ मांकसंस्थाम् ॥ १ ॥ श्रीमत्सौभाग्यज
ननींस्तौमिलक्ष्मींसनातनीम् ॥ सर्वका
मफलावाप्तिसाधनैकसुखावहाम् ॥ २ ॥
स्मरामिनित्यंदेवेशि त्वया प्रेरितमान
सः ॥ त्वदाज्ञांशिरसाधृत्वाभजामिपर ३
मेश्वरीम् ॥ ३ ॥ समस्तसंपत्सुखदाम्म

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
हाश्रियं समस्तसौभाग्यकरीं महाश्रि
यम् ॥ समस्तकल्याणकरीं महाश्रियं
भजाम्यहंज्ञानकरींमहाश्रियम् ॥ ४ ॥
विज्ञानसम्पत्सुखदांसनातनीं विचि
त्रवाग्भूतिकरींमनोहराम् ॥अनंतसंमो
दसुखप्रदायिनींनमाम्यहंभूतिकरींहरि
प्रियाम् ॥ ५॥ समस्तभूतांतरसंस्थिता
CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ल० त्वंसमस्तभूतेश्वरिविश्वरूपे ॥ तन्ना ह०
४ स्ति यत्त्वद्व्यतिरिक्तवस्तुत्वत्पादपद्मं
प्रणमाम्यहंश्रीः ॥ ६ ॥ दारिद्र्यदुःखाघ
तमोपहंत्रि त्वत्पादपद्मं मयिसन्निध
त्स्व ॥ दीनार्तिविच्छेदनहेतुभूतैः कृपा
कटाक्षैरभिषिंचमांश्रीः ॥ ७ ॥ अंबप्रसी ४
दकरुणासुधयार्द्रदृष्ट्या मां त्वत्कृपाद्र

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

विणगेहमिमंकुरुष्व ॥ आलोकयप्रण

तहृद्गतशोकहंत्रि त्वत्पादपद्मयुगलंप्र

णमाम्यहंश्रीः ॥ ८ ॥शांत्यैनमोस्तुशर

णागतरक्षणायै कांत्यैनमोस्तुकमनी

यगुणाश्रयायै ॥ क्षांत्यैनमोस्तुदुरित

क्षयकारणायैधात्र्यैनमोऽस्तुधनधान्य

समृद्धिदायै ॥ ९ ॥ शक्त्यैनमोस्तुश

CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ल० शिशेखरसंस्तुतायै रत्यैनमोऽस्तुरज ह०
५ नीकरसोदरायै ॥ भक्त्यैनमोस्तुभवसा
गरतारकायै मत्यै नमोऽस्तुमधुसूदन
वल्लभायै ॥ १० ॥ लक्ष्म्यैनमोस्तुशुभल
क्षणलक्षितायै सिद्ध्यैनमोस्तुशिवसि
द्धसुपूजितायै ॥ धृत्यैनमोस्त्वमितदुर्ग ५
तिभंजनायैगत्यैनमोस्तु वरसद्गतिदा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यिकायै ॥११॥ देव्यैनमोस्तुदिविदेवग
णार्चितायै भूत्यैनमोऽस्तुभुवनार्तिवि
नाशनायै ॥ दात्र्यैनमोस्तुधरणीधरव
ल्लभायै पुष्ट्यैनमोऽस्तु पुरुषोत्तमवल्ल
भायै ॥१२॥ सुतीव्रदारिद्र्यविदुःख
हंत्र्यैनमोऽस्तुतसर्वभयापहंत्र्यै ॥ श्री
विष्णुवक्षःस्थलसंस्थितायै नमोनमः

CSU Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

सर्वविभूतिदायै ॥ १३ ॥ जयतु जय
तु लक्ष्मीर्लक्षणालंकृतांगी जयतुजय
तु पद्मा पद्मसद्माभिवन्द्या ॥ जयतुज
यतुविद्याविष्णुवामांकसंस्था जयतु
जयतु सम्यक्सर्वसम्पत्करीश्रीः ॥
॥ १४ ॥ जयतु जयतु देवी देवसंघा
भिपूज्या जयतुजयतु भद्राभार्गवीभा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ग्यरूपा ॥ जयतु जयतु नित्यानिर्म
लज्ञानवेद्या जयतुजयतु सत्यासर्वभू
तांतरस्था ॥ १५ ॥ जयतुजयतुरम्या
रत्नगर्भांतरस्था जयतुजयतुशुद्धाशुद्ध
जांबूनदाभा ॥ जयतुजयतुकांताकां
तिमद्भासितांगी जयतुजयतु शान्ता
शीघ्रमागच्छसौम्ये ॥ १६ ॥ यस्याः

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

ल० कलाद्याः कमलोद्भवाद्या रुद्राश्चशक्र ह०
७ प्रमुखाश्चदेवाः ॥ जीवंतिसर्वैअपिश
क्रयस्तेप्रभुत्वमाप्ताः परमायुषस्ते ॥
॥ १७ ॥ लिखनिटिलेविधिर्ममालि
पिंविसृज्यांतरं त्वया विलिखितव्यमे
तादितितत्फलप्राप्तये ॥ तदंतरफलेस्फु ७
टं कमलवासिनीं श्रीरिमां समर्पयसुमु

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

द्विकांसकलभाग्यसंसूचिकाम् ॥ १८ ॥
कल्पयातेयथादेविजीवन्ति सचराच
राः॥ तथासंपत्करेलक्ष्मि:सर्वदासंप्रसी
दमे ॥ १९ ॥ यथाविष्णुर्ध्रुवेनित्यंस्व
कलांसंन्यवेशयत्॥ तथैवस्वकलांल
क्ष्मिमयिसम्यक्समर्पय ॥ २० ॥स
र्वसौख्यप्रदेदेवि भक्तानामभयप्रदे ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ल० अचलांकुरुयत्नेन कलांमद्विनिवेशि ह०

८ ताम्॥२१॥ मुदास्तांमञ्जालेपरमपदल

क्ष्मीःस्फुटकला सदावैकुंठश्रीनिव

सतुकलामेनयनंयोः ॥ वसेत्सत्ये

लोके ममवचासिलक्ष्मीर्वरकला श्रि

यःश्वेतद्वीपेनिवसतुकलामेस्वकरयोः

॥ २२ ॥ तावान्नित्यंममांगेषुक्षीरा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ध्यौश्रीकलावसेतु ॥ सूर्याचन्द्रमसौ
यावद्यावल्लक्ष्मीपतिःश्रिया ॥ २३ ॥
सर्वमंगलसंपूर्णा सर्वैश्वर्यसमन्विता
॥ आद्यादिश्रीर्महालक्ष्मीस्त्वत्कलाम
यितिष्ठतु ॥ २४ ॥ अज्ञानतिमिरंहन्तुं
शुद्धज्ञानप्रकाशिका ॥ सर्वैश्वर्यप्रदामे
स्तुत्वत्कलामायितिष्ठतु ॥ २५ ॥ अ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ल० लक्ष्मींहरतुक्षिप्रं तमःसूर्यप्रभायथा ॥ ह०
१ वितनोतुममश्रेयस्त्वत्कला मयिसं
स्थिता ॥ २६ ॥ ऐश्वर्यंमंगलोत्प
त्तिस्त्वत्कलायांनिधीयते ॥ अहंत
स्मात्कृतार्थोऽस्मिपात्रमास्मिस्थितेस्त
व ॥२७॥ भवदावेशभाग्यार्होभाग्यवा १
नस्मिभार्गवि ॥ त्वत्प्रसादात्पवित्रोहं

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लोकमातर्नमोस्तुते ॥ २८ ॥ पुनासि
मांत्वत्कलयैवयस्मादतः समागच्छम
माग्रतस्त्वम् ॥ परंपदंश्रीर्भवसुप्रसन्ना
मय्यच्युतेनप्रविशाद्यलक्ष्मि ॥ २९ ॥
श्रीवैकुंठस्थिते लक्ष्मि समागच्छम
माग्रतः ॥ नारायणेनसहमांकृपादृ
ष्ट्यावलोकय ३० ॥ सत्यलोकस्थ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ल० तेलक्ष्मित्वंममागच्छसंनिधौ ॥ वासु ह०
१० देवेनसाहिताप्रसीदवरदाभव ॥ ३१ ॥
श्वेतद्वीपास्थितेलक्ष्मि शीघ्रमागच्छ
सुव्रते ॥ विष्णुनासहितेदेविजगन्मा
तर्नमोस्तुते ॥ ३२ ॥ क्षीरांबुधिस्थिते
लक्ष्मि समागच्छसमाधवे ॥ त्वत्कृपा १०
दृष्टिसुधयासततंमांविलोकय ॥ ३३ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रत्नगर्भस्थितेलक्ष्मि परिपूर्णेहिरण्मयि
॥ समागच्छसमागच्छस्थित्वाशुपुर
तोमम ॥ ३४ ॥ स्थिराभवमहाल
क्ष्मिनिश्चलाभवनिर्मले ॥ प्रसन्नेकम
लेदेविप्रसन्नावरदाभव ॥ ३५ ॥ श्रीधरे
श्रीमहाभूतेत्वदंतस्थंमहानिधिम् । शी
घमुद्धृत्यपुरतःप्रदर्शयसमर्पय ॥ ३६ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वसुंधरेश्रीवसुधेवसुदोग्धिकृपामयि ॥
११ त्वत्कुक्षिगतसर्वस्वंशीघ्रं मेसंप्रदर्शय ॥
॥ ३७ ॥ विष्णुप्रियेरत्नगर्भेसमस्त
फलदेशिवे ॥ त्वत्कुक्षिगतहेमाद्दीन्संप्र
दर्शयदर्शय ॥ ३८ ॥ रसातलगतेलक्ष्मि
शीघ्रमागच्छमेपुरः ॥ नजानेपरमंरूपं ११
मातर्मेसंप्रदर्शय ॥ ३९ ॥ आविर्भवम

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नोचेगाच्छशीघ्रमागच्छमेपुरः ॥ मावत्स
मैरिहेत्युक्त्वाकामंगौरिवरक्षमाम् ॥
॥४०॥ देविशीघ्रंसमागच्छधरणीगर्भ
संस्थिते ॥ मातस्त्वङ्कृत्यभृत्योहं मृगये
त्वांकुतूहलात् ॥ ४१ ॥ उत्तिष्ठजागृहि
त्वंमेसमुत्तिष्ठसुजागृहि ॥ अक्षयान्हे
मकलशानसुवर्णेनसुपूरितान् ॥४२ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

निक्षेपान्मेसमाकृष्यसमुद्धृत्य ममा
ग्रतः ॥ समुन्नताननाभूत्वासमाधेहि
धरांतरात् ॥ ४३ ॥ मत्संनिधिंसमाग
च्छमदाहितकृपारसात् ॥ प्रसीदश्रेय
सांदोग्धिलक्ष्मिमेनयनाग्रतः ॥ ४४॥
अत्रोपाविश्यलक्ष्मित्वंस्थिराभवहिर
ण्मयि ॥ सुस्थिराभवसंप्रीत्याप्रसन्ना

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

वरदाभव ॥ ४५ ॥ आनीतांस्त्वंत्वया
देविनिधीन्मेसंप्रदर्शय ॥ अद्यक्षणेनस
हसादत्त्वासंरक्षमांसदा ॥ ४६ ॥ मयि
तिष्ठतथानित्यंयथैंद्रादिषुतिष्ठसि ॥
अभयंकुरुमेदेविमहालक्ष्मिनमोऽस्तुते
॥ ४७ ॥ समागच्छमहालक्ष्मि शुद्ध
जांबूनदप्रभे ॥ प्रसीदपुरतः स्थित्वाप

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

णतंमांविलोकय ॥ ४८ ॥ लक्ष्मिभुवं
गताभासियत्रयत्रहिरण्मयी॥ तत्रतत्र
स्थितात्वंमेतवरूपंप्रदर्शय ॥ ४९ ॥
क्रीडसेबहुधाभूमौपरिपूर्णकृपामयि ॥
मममूर्धनितेहस्तमविलंबितमर्पय ॥
॥ ५० ॥फलद्भाग्योदयेलक्ष्मि समस्त
पुरवासिनि ॥ प्रसीदमेमहालक्ष्मि प

ल० १३

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रिपूर्णमनोरथे ॥ ५१ ॥ अयोध्यादिषु
सर्वेषुनगरेषुसमास्थिते ॥ वैभवैर्विवि
धैर्युक्तेसमागच्छबलान्विते ॥ ५२ ॥
समागच्छसमागच्छममाग्रे भवसु
स्थिरा ॥ करुणारसनिष्यंदनेत्रद्वयवि
लासिनि ॥ ५३ ॥ संनिवर्त्स्वमहाल
क्ष्मित्वत्पाणिंममस्तके ॥ करुणासु

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

धयामांत्वमभिषिंचास्थिरंकुरु ॥ ५४ ॥
सर्वराजगृहेलक्ष्मि समागच्छबलान्वि
ते ॥ स्थित्वाशुपुरतोमेऽद्यप्रसादेनाभयं
कुरु॥५५॥सादरंमस्तकेहस्तंममत्वंकृ
पयार्पय ॥ सर्वराजगृहेलक्ष्मित्वत्कृ
पामयितिष्ठतु ॥ ५६ ॥ आद्यादिश्रीम
हालक्ष्मिविष्णुवामांकसंस्थिते ॥ प्रत्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

क्षंकुरुमेरूपंरक्षमांशरणागतम् ॥ ५७ ॥
प्रसीदमेमहालक्ष्मि:सुप्रसीद महाशिवे
॥ अचलाभववसंप्रीत्यासुस्थिराभवम
द्गृहे ॥ ५८ ॥ यावात्तिष्ठंतिवेदाश्चया
वत्त्वन्नामतिष्ठाति ॥ यावाद्विष्णुश्चयाव
त्त्वंतावत्कुरुरूपांमयि ॥ ५९ ॥ चांद्री
कलायथाशुक्लेवर्धतेसादिनेदिने ॥ त

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

थाद्याते मय्येव वर्धतामभिवर्धताम् ॥
॥ ६० ॥ यथा वैकुंठनगरे यथैव क्षीर
सागरे ॥ तथा मद्भवनेतिष्ठ स्थिरं श्रीवि
ष्णुनासह ॥ ६१ ॥ योगिनां हृदये नित्यं
यथा तिष्ठसि विष्णुना ॥ तथा मद्भवने
तिष्ठ स्थिरं श्रीविष्णुनासह ॥ ६२ ॥ ना
रायणस्य हृदये भवती यथास्ते नाराय

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

णोपितवत्हृत्कमलेयथास्ते ॥ नाराय
णस्त्वमपिनित्यमुभौतथैवतौतिष्ठतांहृ
दिममापिदयावतिश्रीः ॥ ६३ ॥ वि
ज्ञानवृद्धिंहृदये कुरु श्रीः सौभाग्यवृ
द्धिंकुरुमेगृहेश्रीः ॥ दयासुवृद्धिंकुरुतां
मयिश्रीः सुवर्णवृद्धिंकुरुमेगृहेश्रीः ॥
॥ ६४ ॥ नमांत्यजेथाः श्रितकल्पव

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ल० ल्लिसद्भक्तिचिंतामणिकामधेनो ॥ वि ह०
१६ श्वस्यमातर्भवसुप्रसन्ना गृहेकलत्रेषु
चपुत्रवर्गे ॥ ६५ ॥ आद्यादिमायेत्वम
जांडबीजं त्वमेव साकारानिराकृति
स्त्वं ॥ त्वयाकृताश्चाब्जभवांडसंघा
श्चित्रंचरित्रंतवदेविविष्णोः ॥ ६६ ॥ १६
ब्रह्मरुद्रादयोदेवावेदाश्चापिनशक्नुयुः ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

महिमानंतवस्तोतुंमंदोऽहंशंकुयांकथ
म् ॥ ६७ ॥ अंबत्वद्भक्तसवाक्यानिसूक्ता
सूक्तानियानिच ॥ तानिस्वीकुरुसर्वज्ञे
दयालुत्वेनसादरम् ॥ ६८ ॥ भवतींशरणं
गत्वाकृतार्थाःस्युःपुरातनाः ॥ इतिसं
चिंत्यमनसात्वामहंशरणंगतः ।६९॥त
वप्रतिज्ञामद्भक्तानानश्यंतीत्यपि क्वचि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

 तू ॥ इतिसंचिंत्यसंचिंत्यप्राणान्संधार
 याम्यहम् ॥ ७० ॥ त्वदधीनस्त्वहंमात
स्त्वत्स्वरूपामयिवर्तते ॥ यावत्संपूर्ण
कामः स्यांतावद्देहिदयानिधे ॥ ७१ ॥
क्षणमात्रंनशक्नोमि जीवितुंत्वत्स्वरूपं
विना ॥ नजीवंतीहजलजाजलंत्य
क्त्वाजलग्रहाः ॥७२ ॥ हितार्थंपुत्रवा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्सलयाज्जननीप्रस्नुतस्तनी ॥ वत्सं त्व
रितमागत्य संप्रीणयति वत्सला ॥७३॥
यदि स्यां तव पुत्रोऽहं माता त्वं यदि मामि
कीं ॥ दयापयोधरस्तन्यसुधाभिरभि
षिंच मामं ॥ ७४॥ मृग्यो न गुणलेशोपि
मयि दोषैकमंदिरे ॥ पांसूनां वृष्टिबिंदू
नां दोषाणां च न मे मितिः ॥ ७५॥ पापि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९० नामहमेवाग्र्यो दयालूनांत्वमग्रणीः ॥ ९०
१८ दयनीयो मदन्योऽस्ति तवकोत्र जगत्त्र
येऽ॥७६॥विधिनाहंनसृष्टश्चेन्नस्यात्तव
दयालुता ॥ आमयोवानसृष्टश्चेदौषध
स्यवृथोदयः ॥७७॥ कृपामदग्रजाकिं
तेअहंकिंवातदग्रजः ॥ विचार्यदेहिमे १८
वित्तंतवदेवदयानिधे ॥ ७८॥ माता

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

पितात्वं गुरुसद्गतिः श्रीस्त्वमेव संजीव
नहेतुभूता ॥ अन्यन्नमन्येजगदेकनाथे
त्वमेवसर्वंममदेविसत्यम् ॥७९॥ आद्या
दिलक्ष्मीर्भव सुप्रसन्नाविशुद्धविज्ञान
सुखैकदोग्ध्री ॥ अज्ञानहंत्रीत्रिगुणाति
रिक्ताप्रज्ञाननेत्रीभवसुप्रसन्ना ॥८०॥
अशेषवाग्जाड्यमलापहारिणी नवंन

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

८० वंस्पष्टसुखप्रदायिनी ॥ ममेहजिह्वा
१९ ग्रसुरंगनर्तकी भव प्रसन्ना वदनेच मे
श्रीः ॥ ८१ ॥ समस्तसंपत्सुविराजमा
नासमस्ततेजःसुविभासमाना ॥ वि
ष्णुप्रियेत्वं भवदीप्यमाना वाग्देवता
मेवदनेप्रसन्ना ॥ ८२ ॥ सर्वार्थदासर्व
जगत्प्रसूतिः सर्वैश्वरी सर्वभयापहंत्री

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ सर्वोन्नतात्वंसुमुखी भवश्रीहिरण्म
यीमेनयनेप्रसन्ना ॥ ८३ ॥ सर्वप्रदर्शौ
सकलार्थदेत्वं प्रभासुलावण्यदयाप्रदो
ग्ध्री॥ सुवर्णदात्वंसुमुखीभवश्रीहिरण्म
यीमेनयनेप्रसन्ना ॥ ८४ ॥ समस्तवि
घ्नौघविनाशकारिणी समस्तभक्तोद्ध
रणेविचक्षणा ॥ अनन्तसौभाग्यसुख

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

प्रदायिनीहिरण्मयीमेनयनेप्रसन्ना ॥
॥ ८५ ॥देविप्रसीददयनीयतमायमह्यं
देवाधिनाथ भवदेवगणाभिवंद्ये ॥ मा
तस्तथैवभव सान्निहितादृशोर्मे पत्यास
मंममसुखेभवसुप्रसन्ना ॥ ८६ ॥ माव
त्सभैरभयदानकरोऽर्पितस्ते मौलौममे
तिमयिदीनदयानुकंपे ॥ मातःसम

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

र्यमुद्राकरुणाकटाक्षं मांगल्यबीज
मिहनःसृजजन्ममातः॥ ८७ ॥ कटा
क्षइहकामधुक्तवमनस्तुचिंतामणिःक
रःसुरतरुः सदानवनिधिस्त्वमेवेंदिरे ॥
भवेत्तवदयारसो रसरसायनंचान्वहं
मुखं तव कलानिधिर्विविधवांछिता
र्थप्रदम् ॥ ८८ ॥ यथारसस्पर्शनतोऽय

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ल० सोपिसुवर्णतास्यात्कमलेतथाते ॥ क ह०
२१ टाक्षसंदर्शनतोजनानाममंगलानामपि
मंगलत्वं ॥ ८९ ॥ ॥ देहीतिनास्ती
तिवचः प्रवेशाद्भीतो रमे त्वांशरणंप्रप
द्ये ॥ अतः सदास्मिन्नभयप्रदात्वंसहै
वपत्यामयिसन्निधेहि ॥ ९० ॥ कल्पद्रु २१
मेणमणिना सहितासुरम्या श्रीस्तेक

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लामयिरसेनरसायनेन ॥ आस्तांयतो
मम च दृक्श्रुतिपाणिपादस्पृष्टाः सुवर्ण
वपुषः स्थिरजंगमाःस्युः ॥ ११ ॥ आद्या
दिविष्णोःस्थिरधर्मपत्नीत्वमंब पत्या
मयिसंनिधेहि ॥ आद्यादिलक्ष्मित्व
दनुग्रहेणपदेपदे मे निधिदर्शनंस्यात्
॥ १२ ॥ आद्यादिलक्ष्मीहृदयंपठेद्यः स

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ल० राजलक्ष्मीमचलांतनोति ॥ महादरि ह०
२२ द्रोपिभवेद्धनाढ्यस्तदन्वयेश्रीः स्थिर
तां प्रयाति ॥ १३ ॥ यस्यस्मरणमात्रेण
तुष्टास्याद्विष्णुवल्लभा ॥ तस्याभीष्टंद
दात्याशुतंपालयातिपुत्रवत् ॥ १४ ॥ इ
दंरहस्यं हृदयंसर्वकामफलप्रदम्॥जपः २२
पंचसहस्रंतुपुरश्चरणमुच्यते॥ १५॥ त्रि

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

कालमेककालंवा नरो भक्तिसमन्वि
तः ॥ यः पठेच्छृणुयाद्वापि सयातिपर
मांश्रियम् ॥ १६ ॥ महालक्ष्मींसमुद्दि
श्यनिशिभार्गववासरे ॥ इदंश्रीहृदयंज
प्त्वापंचवारं धनीभवेत् ॥ १७ ॥ अ
नेनहृदयेनान्नंगर्भिण्यैप्रतिमंत्रितम् ॥
दद्यातितत्कुलेपुत्रोजायतेश्रीपतिः स्व

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यम् ॥ ९८ ॥ नरेणवाथवानार्यालक्ष्मी
हृदयमंत्रिते ॥ जलेपीतेचतद्दंशेमंदभा
ग्योनजायते ॥ ९९ ॥ यआश्विनेमा
सिचशुक्लपक्षे रमोत्सवेसंततमेकभ
क्त्या ॥ पठेत्तथैकोत्तरवारवृद्ध्यालभे
त्सौवर्णमयींसद्यष्टिम् ॥ १०० ॥ यएक
भक्तोन्वहमेकवर्षंविशुद्धधीः सप्ततिवा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

रज्ञापी ॥ समंदभाग्योपिरमाकटाक्षा
न्भवेत्सहस्राक्षशताधिकश्रीः ॥ १०१ ॥
श्रीशांघ्रिभक्तिंहरिदासदास्यं प्रपन्नमं
त्रार्थदृढैकनिष्ठाम् ॥ गुरोःस्मृतिंनिर्मल
बोधबुद्धिंप्रदेहि मातःपरमं पदं श्रीः ॥
॥ १०२ ॥ पृथ्वीपतित्वंपुरुषोत्तमत्वं
विभूतिवासंविविधार्थसिद्धिं ॥ संपूर्ण

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९० कीर्तिबहुलोकवश्यंवयः स्थिरत्वंलल ९०
२४ नासुभोगम् ॥१०३॥ वेदार्थसिद्धिंबहु
लोकवश्यंवयः स्थिरत्वंपरमैकनैष्ठ्य
म्॥ पुत्रादिलब्धिं सकलार्थसिद्धिं प्रदे
हिमेभार्गविजन्मजन्मानि ॥ १०४ ॥
सुवर्णवृष्टिं कुरुमेगृहेश्रीःसुधान्यवृद्धिं २४
कुरुमेगृहेश्रीः॥कल्याणवृद्धिंकुरुमेगृहे

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

श्रीर्विभूतिवृद्धिंकुरुमेगृहेश्रीः॥ १०५॥
ध्यायेल्लक्ष्मींप्रहसितमुखीं कोटिबाला
र्कभासं विद्युद्वर्णांबरवरधरां भूषणा
ढ्यांसुशोभाम्॥ बीजापूरंसरसिजयुगं
बिभ्रतीं स्वर्णपात्रं भर्त्रायुक्तां मुहु
रभयदां मह्यमप्यच्युतश्रीः॥ १०६ ॥
इति श्रीअथर्वणरहस्ये आद्यादिश्रीमहालक्ष्मीहृदयस्तोत्रं
संपूर्णम् ॥ श्रीकृष्णार्पणमस्तु ॥ १ ॥ शुभमस्तु ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ल० श्रीगणेशाय नमः ॥ आचम्यप्राणाना ह०
२९ यम्य देशकालौस्मृत्वा ॥ ममाभीष्टसि
द्ध्यर्थं संकलीकरणरीत्यासंपुटीकरण
रीत्यावासकृदावर्तनंकरिष्ये ॥ अस्य
श्रीनारायणहृदयस्तोत्रमंत्रस्य भार्ग
वऋषिःअनुष्टुप्छंदः श्रीलक्ष्मीनाराय २९
णोदेवता ॐबीजं नमःशक्तिःनारायणा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

यतिकीलकम् श्रीलक्ष्मीनारायणप्री
त्यर्थेजपेविनियोगः॥अथन्यासःॐना
रायणःपरंज्योतिरित्यंगु०॥ नारायणः
परंब्रह्मेतितर्जनीभ्यां०॥ॐनारायणःप
रोदेवइतिमध्यमाभ्यां०॥ ॐनारायणः
परंधामेतिअनामिकाभ्यां० ॥ ॐनारा
यणःपरोधर्मइतिकनि०॥ ॐविश्वंनारा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

९० यण:साक्षात् इति करतलकर०॥ एवंहृद ९०
२६ यादि॥ ॥ अथादिग्बंधः॥ ॐऐंद्र्यादिदश
दिशं ॐ नमःसुदर्शनाय सहस्राराय हुं
फट् बध्नामि नमश्चक्रायस्वाहा ॥ इतिप्र
तिदिशंयोज्यम्॥ अथध्यानं॥ ॐउद्यद्भा
स्वत्समाभासश्चिदानंदैकदेहवान्॥ शंख २६
चक्रगदापद्मधरोध्येयोमहेश्वरः ॥ १ ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लक्ष्मीधराभ्यामाश्लिष्टः स्वमूर्तिगण
मध्यगः ॥ ब्रह्मवायुशिवाहीशविपैःश
क्रादिकैरपि ॥ २ ॥ सेव्यमानोधिकंभ
क्त्यानित्यंनिःशेषशक्तिमान् ॥ मूर्तयो
ष्टावपिध्येयाश्चक्रशंखवराभयैः॥३॥यु
क्ताःप्रदीपवर्णाश्चसर्वाभरणभूषिताः ॥
श्रीनारायणप्रेरणयाश्रीनारायणप्रीत्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

र्थंश्रीनारायणाष्टकमंत्रपठनंकरिष्ये ॥

॥ॐनमोनारायणायेतिजपः॥

अथमूलाष्टकम् ॥ ॥ ॐनारायणःपरं
ज्योतिरात्मानारायणःपरः॥ नारायणः
परंब्रह्मनारायणनमोस्तुते॥ १॥ नाराय
णःपरोदेवआत्मानारायणःपरः॥ नारा
यणः परंधाता नारायणनमोऽस्तुते ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ २ ॥ नारायणःपरंधामध्यानंनाराय
णःपरः ॥ नारायणःपरोधर्मोनारायण
नमो ० ॥ ३ ॥ नारायणःपरोवेद्योविद्या
नारायणः परः ॥ विश्वंनारायणःसाक्षा
न्नारायण० ॥ ४ ॥ नारायणाद्विधिर्जा
तोजातोनारायणाच्छिवः ॥ जातोना
रायणादिंद्रोनाराय० ॥ ५ ॥ रविर्नारा

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ल० यणस्तेजश्चंद्रोनारायणोमहः॥ वह्निर्ना ह०
२८ रायणःसाक्षान्नारायणन०॥ ६ ॥ नारा
यणउपास्यःस्याद्गुरुर्नारायणःपरः ॥
नारायणःपरोबोधोनारायण० ॥ ७ ॥
नारायणःफलंमुख्यं सिद्धिर्नारायणः
सुखम् ॥ सेव्योनारायणःशुद्धोनाराय २८
णनमोस्तुते ॥ ८ ॥ इतिमूलाष्टकम् ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

॥ अथप्रार्थनादशकम् ॥ ॥ नारायण
स्त्वमेवासिदहराख्येहृदिस्थितः ॥ प्रे
रकःप्रेर्यमाणानां त्वया प्रेरितमान
सः ॥ १ ॥ त्वदाज्ञांशिरसाधृत्वाजपा
मिजनपावनम् ॥ नानोपासनमार्गाणां
भावकृद्भावबोधकः ॥ २ ॥ भावार्थकृ
द्भवातीतोभवसौख्यप्रदोभव ॥ त्व

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ल० न्मायामोहितंविश्वंत्वयैवपरिकल्पितं ह०
२९ ॥ ३ ॥ त्वदधिष्ठानमात्रेणसैवसर्वार्थ
कारिणी ॥ त्वमेवतांपुरस्कृत्यममका
मान्समर्पय ॥ ४ ॥ नमेत्वदन्यस्त्राता
स्तित्वदन्यन्नाहिदैवतम् ॥ त्वदन्यन्नाहि
जानामिपालकंपुण्यवर्धनम् ॥ ५ ॥ २९
यावत्सांसारिको भावोमनःस्थोभाव

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

नात्मकः ॥ तावात्सिद्धिर्भवेत्साध्या
सर्वथासर्वदाविभो ॥ ६ ॥ पापिनाम
हमेवाऽयोदयालूनांत्वमग्रणीः ॥ द
यनीयोमदन्योऽस्तितवकोऽत्रजगत्त्रये
॥ ७ ॥ त्वयाप्यहंनसृष्टश्चेन्नस्या
त्तवदयालुता ॥ आमयोवानसृष्टश्चे
दौषधस्यवृथोदयः ॥ ८ ॥ पापसंघ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

परिक्रांतःपापात्मापापरूपधृक् ॥ त्वदन्यःकोऽत्र पापेभ्यस्त्रातामेजगतीतले॥ ९ ॥ त्वमेवमाताचपितात्वमेव त्वमेवबन्धुश्चसखात्वमेव ॥ त्वमेवविद्याद्रविणंत्वमेव त्वमेवसर्वं ममदेवदेव ॥ १० ॥ प्रार्थनादशकंचैवमूलाष्टकमथद्वयम् ॥ यःपठेच्छृणुयान्नित्यंतस्य

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लक्ष्मीः स्थिराभवेत् ॥ ११ ॥ नारायण
स्यहृदयंसर्वाभीष्टफलप्रदं ॥ लक्ष्मीह
दयकंस्तोत्रंयदिचैतद्विनाकृतम् ॥ १२ ॥
॥ तत्सर्वंनिष्फलंप्रोक्तंलक्ष्मीः क्रुद्ध्य
तिसर्वदा ॥ एतत्संकलितंस्तोत्रंसर्वक
र्मफलप्रदं ॥ १३ ॥ लक्ष्मीहृदयकंचैवत
थानारायणात्मकम् ॥ जपेद्यः संपुटीकृ

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

त्यसर्वाभीष्टमवाप्नुयात् ॥ १४ ॥ ना
रायणस्यहृदयमादौजप्त्वाततः परं ॥
लक्ष्मीहृदयकंस्तोत्रं जपेन्नारायणंपु
नः ॥ १५ ॥ पुनर्नारायणंजप्त्वापु
नर्लक्ष्मीहृदंजपेत् ॥ १६ ॥ एवंम
ध्येद्विवारेणजपेत्संकलितंहितत् ॥
॥ १७ ॥ तद्वद्धोमादिकंकुर्यादेतत्संक

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

लितंशुभम् ॥सर्वान्कामानवाप्नोतिआ
धिव्याधिभयंहरेत् ॥ १८ ॥ गोप्यमेत
त्सदाकुर्यान्नसर्वत्रप्रकाशयेत् ॥ इतिगु
प्ततमंशास्त्रंप्राप्तंब्रह्मादिकैःपुरा॥ १९ ॥
तस्मात्सर्वप्रयत्नेन गोपयेत्साधयेत्सु
धीः ॥ यत्रैतत्पुस्तकंतिष्ठेल्लक्ष्मीनारा
यणात्मकम् ॥ २० ॥ भूतपैशाचवेता

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

ळानस्थिरास्तत्रसर्वदा ॥ लक्ष्मीहृदयकंप्रोक्तंविधिनासाधयेत्सुधीः ॥ ॥ २१ ॥ भृगुवारेचरात्रौचपूजयेत्पुस्तकद्वयम् ॥ सर्वथासर्वदासत्यंगोपयेत्साधयेत्सुधीः ॥ २२ ॥ गोपनात्साधनाल्लोके धन्योभवतितत्त्वतः ॥ २३ ॥

इत्यथर्वणरहस्येउत्तरभागेनारायणहृदयंसंपूर्णम् ॥

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इदं लक्ष्मीहृदयं नारायणहृदयं च कल्याणनगर्यां श्रीकृष्णदासात्मज-गंगाविष्णुना स्वकीये "लक्ष्मीवेङ्कटेश्वर" मुद्रायन्त्रालये मुद्रितम् ।

संवत् १९५३, शके १८१८.

पुस्तक मिलनेका ठिकाना–

गंगाविष्णु श्रीकृष्णदास,

"लक्ष्मीवेंकटेश्वर" छापाखाना.

कल्याण–मुंबई.

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF

इति लक्ष्मीनारायणहृदये

सम्पूर्णं ।

CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri

Ramakrishnapuram, Virugambakkam, Madras-600092, Rs. 5;
i Lakshmi Varalarum Vazhipadum: Bee Sree, General Publishers, No. 8, VC Garden II Street, Mandaiveli, Madras-600028, Rs. 19;
enniyam (Collection of Articles on Feminism): Kaavya No.16, 17th E Cross, Indira Nagar, Bangalore-560038, Rs. 30;
aaraa: Tamil Nadan, Alaigal Veliyeettagam, No. 36, South Sivan Koil Street, Kodambakkam, Madras-600024, Rs. 30;
Sri Vaishnavan: V. N. Gopala Desikan Swamy, By Author: Ernakulam.
Muththamizh Kavignar Mohanarangan Kavithai Natakangal: Dr. K. Mohanarangan, Meena Gopal Pathippagam, No. 4, Joseph Colony, Adambakkam, Madras-600088, Rs. 55;
Vidhuthalai (Thani Thamizh Kurumbaviyal): Aghavan By Author: No. B8/5, Malligai Kudiyiruppu, K.K. Nagar, Madurai-625020, Rs. 5;
Makizhchiye Maruthuvam: B. S. R. Rao, Narmada Pathippagam, T. Nagar, Madras-600017, Rs. 18;
Akkalaththu Siddha Vaidya Palamuraigal: Dr. M. Nandakumar, Saraswathi Mahal Library, Thanjavur, Rs. 10;
Ingal Gunam Eppadi: S. Sankaran, Parvathi Kannadasan Pathippagam, No. 12, Kannadasan Salai, T. Nagar, Madras-600017, Rs. 21;
Agasthiar 12000 Ennum Perunool Kaviyam Vol I: S. P. Ramachandran Ed., Thamarai Noolagam, No. 7, NGO Colony, Vadapalani, Madras-600026, Rs. 35;
Aalai Arasar Karumuthu Thiagarasar: Dr. Radha Thyagarajan, Vanathi Pathippagam, Madras 600017, Rs. 100;
Dheerkatharisi (Kahlil Gibran): Puviyarasu, Rs. 14; Pul Thanagavae Valarugirathu (Zen Philosophy): Osho Tr. Anand Paramesh, Dr. M. P. Swamy, Rs. 23; Kannadasan Pathippagam, No. 12, Kannadasan Road, T. Nagar, Madras-600017.
Ini (Novel): Sivasankari, Rs. 45; Vazhvukku Oru Tharagai, Uma Chandran Rs. 30; Pani Padarntha Malaiyin Malae (Himalayan Expedition: Saraswathi Sundararajan, Rs. 12; Gangai Puthaka Nilayam, T. Nagar, Madras-60017.
Thanjam Pugundavargal: Che Yoganathan, Rs. 24; Kadavul Pokal: Padma Somakanthan, Rs. 20; Ilangaiyil Thamizhputhinap Pathrigaiyin Valarchi: E. Sivagurunathan, Rs. 30; Paari Nilayam, No. 184, Broadway, Madras-600108.
Manathil Olikkum Maniyosaigal: Nagarajan, Mahalakshmi Pathippagam, No. 187, Vellalar Street, ...walkam, Madras-600084, Rs. 16;

avoiding a conflict ... himself. In fact, the author further states that he h... introduced certain characters into his work whi... do not find a place in the original, and he had d... so only for the purpose of speaking through the ch... acters as Kamban has done through his own po...

Whatever may be the claim that has been m... for the book by the author as well as by the... scholars who have given forewords, complime... the author, it is unfortunate that the introduct... new characters which are in fact admittedly ... characters (which generally finds a place in an... ma) not only does not add to the usefulness ... book but also detracts from its merits.

It may be pointed out that the story as told... dramatised form does not bring out the nuanc... the inimitable genius of Kamban; on the othe... it detracts from the originality and creative... ination of the Emperor of Poetry who had s... story to suit Tamil culture and the Tamil sa... out departing from the basic outline of Sag... ki's creation. It is regrettable that the work... have been done in a superficial manner ... making any effort whatever to bring out th... genius and the story-telling competence of ... ter of Poetry. It is not simply converting ... from running poetry into dialogues thr... mouth of the characters; but what is more ... — is to bring out the essential and immorta... and minute but yet majestic words and ... deliberately chosen and adopted — by the ... et.

Such flaws which in a way are deroga... unique greatness of Kamban, are innum... any attempt to enumerate the same in a s... will be only incomplete. For instance, ... request of Viswamitra, Rama killed Thata... thor says that after having fought a ferc... Thataka, Rama aimed an arrow at the ... taka and killed her. Nowhere Kamban ... such fierce battle by Rama. If he had ... would be contradicting himself when ... that 'Kai Vannam Angu Kanden, Kaal ... Kanden'.

Similarly, in the meeting between R... ha, the author states that on the appr... to the hut, when Lakshmana came ... Guha as to who he was and what he ... replied that he was a hunter who ... boats and he came there to worship th... As a matter of fact Kamban's version i... and it has been deliberately given ... emphasise the innocence of Guha and ... Prince of Ayodhya, whom Guha had ...

CC-0. In Public Domain. Digitization by eGangotri. Funding MIDF
CSU-Sringeri Campus Rare Book and Manuscript Collection, Sringeri